Substance, country-made paper. 11×5 inches. Folia, 31. Lines, 7 on a page. Extent in ślakas, 420. Character, modern nagara, Date Samvat 1934. Appearance, fresh. Complete.

Life of Vallabhācārya, the incarnation of God Viṣṇu, he being preceded by Viṣṇu Swāmī, the incarnation of Sudarśana, by Mādva, the incarnation of Hanumān, and by Rāmānuja, the incarnation of Lakṣmaṇa. The mission of all the four incarnations is to deliver the world engulfed by disguised Buddhism as preached by Śaṅkara who was again the incarnation of Rudra.

Beginning :—

जयति स विष्णुस्वामी (विश्वामी ?) वल्लवल्लभस्वामी ।
यत् कृपयाहमिहासं पूर्व्वं चिरद्वैतभावनाविष्टः ॥
श्रीवल्लभश्रीविठ्ठलचरणं संसारतारणि शरणं ।
हृदये विभाव्य भाव्यं चरित्रचिन्तामणिं कुर्व्वे ॥

अथ भगवान् पूर्णपुरुषोत्तमो गोलोके सर्व्वांशक्यकार्य्यकरणार्थं ब्रह्मादिभिर्विज्ञापितो निजानंदामयास्याश्यावतारश्रीवल्लभाचार्य्यं केशावतारमि (?) व्याख्याने व्यासादिवत् स्वांशं अवतारयामास............
यथा सर्व्वांशक्यकार्य्यकरणार्थं पुरा पुरुषोत्तमाविर्भावस्तथा तत्रापि इति हेतुविनिश्चयपूर्व्वकं मवंपदोपस्थापिताचार्य्यांतराशक्यत्वपूर्व्वकं तत्तदाचार्य्यांतराविर्भावेपि हेतुविनिश्चयपूर्व्वकं सर्व्वं विचार्य्यते ।

The birth of Vallabha is described in 15A—

एकदा तत्र देशे दक्षि[ण]दिशि तैलंगे स्वंभकाकरग्रामे परचक्रभयादुपद्रुता लोकाः पलायिताः । तेषु पलायितेषु लक्ष्मणदीक्षितेपि चंपकारण्यं गते मध्ये मार्गे तद्धर्म्मपत्नी सत्ववती गंतुमशक्याऽनुयांती तेजस्वती रक्षोघ्नेन विपिनशमीतरुतले प्रसूतं स्वात्मजं तत्र निधाय तदाश्रुतशोक इव स जातः पुनर्निर्भयता[यां] सर्व्वत्र जातायां यथैवानुजगाम । अथ निर्भयदेशे गत्वा कियद्दिवसं स्थित्वा तन्निवेद्य पतिमनुचरन् । तदाश्रुत्य सशोक इव स जातः ।

When Lakṣmaṇa Dīkṣita, after sometime, came back to the spot where the child was born and abandoned, he found it still lying there and living. This child was Vallabhācārya.

It ends :—श्रीवल्लभो ध्यानवलाद्यथैव
ह्युपादिशद्गोकुलनाथनाथः ।
चरित्रचिन्तामणिनामधेयं
निबंधयामास तथैव सर्व्वं ॥

Colophon. इति श्रीशाचार्य्यवर्य्यवल्लभमतानुवर्त्तिना श्रीगोस्वामिरघुनाथात्मजदेवकीनंदने[न] विरचितो भगवदाचार्य्यचारुचरित्रचिन्तामणिः समाप्तः ।

Post Colophon. याद्दशं etc.

इदं अक्षरं व्रजभूषणदा ॥ स गुजराती काशीवासी ॥

मी० अगहन सुदी १५ ॥ संवत् १८३४ ॥

3120

1666. The same.

Substance, country-made paper. 10½″ × 4½″. Folia, 20. Lines 8 on a page. Extent in ślokas 350. Character Nāgara. Date, Sam. 1926. Complete.

This professes to be a biography of Vallabhācārya though it is full of miracles and supernatural incidents. Vallabha is said to be an incarnation of Agni. His father was Lakṣmaṇa Dīkṣita. He is said to have been a Tailaṅga Brahmin. Lakṣmaṇa's residence was at Khaṁbhaṁkākar. The country was invaded by a hostile army and people fled. On the way under a Śamī tree Lakṣmaṇa's wife gave birth to a son. But in her hurry she left the child there. But when peace was established the husband and wife returned there and picked up the child. This was Vallabha. The biography of Vallabha comes to an end in page 176. Then commences the biography of his son Viṭṭhala. The author was a follower of Vallabhācārya.

Interesting quotations.

3 A. इति निशम्य मर्य्यादां पुरुषोत्तमः स्वपार्श्वे समागतं रुद्रं आह ।
त्वं च रुद्रः महाबाहो मोहनार्थं सुरद्विषां ।
पाषण्डाचरणं धर्म्मं कुरुष्व सुमहामते ॥
तामसानि पुराणानि कथयस्व च तान् प्रति ।
मोहनानि च शास्त्राणि कुरुष्व सुरसत्तम ॥
मय्यभक्ताश्च ये विप्राः भविष्यन्ति महर्षयः ।
तच्छक्त्या तान समाविश्य कथयस्व च तासमान् [तामसान्] ॥
काणादिं गौतमं शक्तिमुपमन्युं च जैमिनिं ।
दुर्व्वासिसं च कपिलं मृकण्डं च बृहस्पतिम् ॥
भार्गवं जमदग्निं च दशैतान् तामसान् ऋषीन् ।

.. ..

कपालभस्मचर्म्माणि चिह्नान[न्य]मरपूजितान् ।
पुराणानि च शास्त्राणि तत्परत्वेन बृंहिताः ॥
तथा पाशुपतं शास्त्रं त्वमेव कुरु सुव्रत ।
कङ्कालं शैवपाषण्डमहाशैवादिभेदतः ॥

5 A. बौद्धशास्त्रमसत्प्रोक्तं नग्ननीलपटादिकं ।
सर्व्वकर्म्मपरिभ्रष्टं विकर्म्मणां तदुच्यते ॥

इति वाक्यात् तदातिभ्रान्त-शास्त्राणि तद्द[ि]षप्रोक्तानि दृष्ट्वा असुरा भ्रामिताः सर्व्वपरिभ्रष्टाः बभूवुः । अथ रुद्रेणोपरितना असुराः भ्रामिताः बुद्धेन भूतले मानुषाः इति ज्ञेयं । ..तदानीं भगवता वौद्धादिविमतध्वान्त-ध्वंसके मे सुदर्शनं इति बुध्या[द्धा] प्रेषितं तदागत्य इह सुदर्शनः मुनिः बभूव पौराणो निम्बार्क इति विश्रुतः ।

यथा दर्शितवान् सर्व्वशास्त्राणि तिमनगलमिति तदैव ब्रह्मसूर्य्यांशकैः देवप्रबोध-सुरेश्वरौ न्यायमीमांसकावितौजातौ जैनमतापहौ । तथापि किञ्चित् अप्रचारं विलोक्य तदैव व्यासो भगवता यथार्थकथनाय भूतले प्रेषितः । स द्राविड़ो विष्णुस्वामी भूत्वा......सर्व्वशास्त्राणि भागवतं च याथातथ्येन योजयामास ।

Rudra came down to earth as Śaṅkarācārya and established Māyāvāda. Rāma send Hanūmān as Mādvācārya but he became a follower of Śaṅkara and so Lakṣmaṇa volunteered to go on earth and became Rāmānuja. He too failed and so Rāma again send Agni as Vallabhācārya.

3121

1314. सम्प्रदाय-प्रदोप Sampradāya-pradīpa.
By Gadādhara.

Substance, country-made paper. 10 x 5½ inches. Folia, 50. Lines, 9 on a page. Extent in ślokas, 900. Character, Nāgara. Appearance, tolerable, Complete.

The author Gadādhara wrote the work, when, Viṭṭhala, the son of Vallabha, the founder of the sect, was the high priest of the sect. Viṭṭhala was a contemporary of Ākbar.

Gadādhara describes himself thus in leaf 50.

अर्व्वुदारण्यसम्भूतो द्विवेदोह गदाभिधः ।
सम्प्रदायप्रदीपाख्यं ग्रन्थमेनं चकार ह ॥
वासं कृत्वा वृन्दारण्ये धृत्वा चित्तं श्रीराधिशे ।
ग्रन्थं कृत्वा गदनामा(य) कृतकृत्योऽस्तु श्रीकृष्णात् ॥
अर्व्वुदादग्निदिग्भागे ह्यघोरगिरिसन्निधौ ।
एकलिङ्गाच्छिवच्चैत्रात् नैऋर्त्यां दिशि विश्रुतं ॥
सर्व्वसेवोपकरणं श्यामसुन्दरमन्दिरम् ।
वसन्ति तत्र तत्सेवां कुर्व्वन्तश्च कथां मुदा ॥
गदाख्यपुत्रपौत्राद्या रामदत्तादयः श्रुताः ।
श्रीवल्लभोक्तमार्गेण कृष्णसेवापराः सदा ॥
भवन्तु सुखिनः सर्व्वे श्रीकृष्णस्य प्रसादतः ।
तेषु नित्यं प्रसन्नोऽस्तु श्रीमद्वल्लभनन्दनः ॥
मदन्वयस्वीकरणे सदा भवतु वल्लभः ।

The date and place of composition of the work (50 B).

श्रीमन्नृपविक्रमार्कसमयात् षोड़शशताधिकदशमसंवत्सरे श्रीमद्वृन्दावने श्रीगोविन्ददेवसान्निध्ये द्विवेदिगदाख्येन ग्रन्थोऽयमकारि ।

That is, 1554 A.D. at Vṛndāvana.

In the 2nd prakaraṇa is given the story of Viṣṇu Svāmī, the son of a minister of a king of Drāviḍa who, by his devotion, saw Kṛṣṇa in his real form and received from him the Vaiṣṇava method of worship. He founded a sect in which, long after him, flourished Vilvamaṅgala. Vallabha was a follower of this sect.

The third chapter gives the history of the rise of Śaṅkara's sect. Śaṅkara is regarded as an incarnation of Śiva who came to the world with the express object of confounding men. Then comes the story of Kumārapāla and Hemācārya, and the prevalance of Jainism in Guzerat and of the expulsion of Brāhmaṇas therefrom. But Hemācārya was at last defeated in argument by Devaprabodha Bhaṭṭācārya, and Hema was condemned to death. Then comes the story of Mādhvācārya who deserted Śaṅkara's sect and founded a sect of his own, having received his inspiration from Rāmacandra direct. Between Vilvamaṅgala and Mādh-

vācārya was born at Drāviḍa, a learned Brāhmaṇa Rāmānuja by name, who received his inspiration from Lakṣmī and founded a sect. Nimbāditya was born at Pāṇḍarpur famous for its great shrine of Viṭhṭhala. He founded a new sect. All these founders wrote commentaries on Upaniṣads, Gītā, Bhāgavata and Vyāsasūttra according to their own theories and many independent treatises too. There is a śloka about the spread of the theory of Bhakti in 7B.

उत्पन्ना द्राविड़े भक्तिः वृद्धिं कर्णाटके गता ।
क्वचित् क्वचिन्महाराष्ट्रे गुर्ज्जरे प्रलयं गता ॥

The fourth prakaraṇa of the work treats of the biography of Vallabha.

26 A. अस्ति दक्षिणापथे तिलङ्गाभिधो जनपदः। यत्र ब्राह्मणाः कलिं पराभूय वैदिकं धर्म्ममनुतिष्ठन्ति……यत्राद्यापि वेदाः सवीर्य्या वर्त्तन्ते यत्र सकलब्राह्मणगुणालङ्कृत-श्रीमल्लक्ष्मणभट्टकुलकमलविकाशमार्त्तण्डः श्रीवल्लभाचार्य्यः प्रादुर्बभूव ॥…… ………………… ……एकदा तिलङ्गदेशात् श्रीलक्ष्मणदीक्षितः काश्यां समागतं तत्राश्रमक्रमेण गृहाश्रमवाप्य यथोक्तं गार्हस्थं पालयामास। एतस्मिन्नन्तरे तद्धर्म्मपत्नी कृताधानादिसंस्कारा गर्भं दधार। तद्दिनादारभ्य सप्तमे मासि प्राप्ते काश्यां परचक्रमाजगाम तद्भयात् सकलमपि पुरं पलायितं। तत्पत्न्याः पलायन्त्याः पथि महावने सप्तममासीयो गर्भः विस्रंसितः। ततो महातरुतले तरुपत्राण्यास्तीर्य्य तत्रामगर्भं मुक्त्वा कुत्राप्यभयदेशं गता। ततः काश्याः सकाशात् परचक्रं निवृत्तं सम्यक् स्वास्थ्यं जातं। तदा लक्ष्मणदीक्षितपत्नी काशीं प्रत्यायन्ती यत्र गर्भो मुक्तस्तत्रायाता……यावत्तरुतले तौ दम्पती गतौ तावत् महज्ज्वाला विराजितं तत्र अग्नियपुञ्जं ददृशतुः आहतुश्च………अमानुषोऽयं गर्भः जीवन्निह तिष्ठति अथैनं गृहीत्वा यास्यावः इत्युक्त्वा गर्भं नीत्वा गृहं प्रति प्रस्थितौ……तदनु साङ्गो गर्भो ववृधे…… पिता वल्लभ इति नाम चकार। एवं क्रमेण गर्भाष्टमे वर्षे जाते कृतोपनयनो वेदमधीतवान्…………अग्नि विप्ररूपः स्वप्ने प्रादुर्बभूव आह च अहमग्निर्भगवदाज्ञया पुत्रतां गतः मदनुभावे निःसन्देहो भव……कियति काले गते सति लक्ष्मणदीक्षिताः कालधर्म्ममवापुः……[वल्लभः] श्रीशेषकृतपाणिनीयव्याख्यां समाप्य व्यास-

सूत्र-जैमिनीयसूत्र-गौतम-कणाद-कपिल-पातञ्जलिः तत्र व्याख्यां [तत्त-द्व्याख्यां] पौरुषेयीं साङ्गामवलोक्य नातिप्रसन्नमना बभूव। ततः श्रीवल्लभो वैष्णवतन्त्र-शैवतन्त्र-प्राभाकर-कौमारिल-मौद्गलमतादिशास्त्राणि विष्णु-स्वामि-रामानुजमाध्वाचार्य्यनिम्बादित्यप्रोक्तश्रुत्यादिभाष्यसिद्धान्त-परिज्ञानाय काश्यां तेषां अप्रवृत्ति[ं]दृष्टा[ष्ट्वा] दक्षिणापथे तत्प्रवृत्तिं श्रुत्वा पुनर्दक्षिणा-पथं प्रस्थितः तत्र गत्वा तानि सर्व्वाण्यवलोक्य विद्यानगरं समागतः तदा तत्र कृष्णनामा राजा वर्त्तते तत्र माध्वाचार्य्यमार्गमायावादतिमिरनाशन-प्रदीपः श्रीव्यासतीर्थनामा यतिर्वर्त्तते··· तदा राजसभायां मायावादितत्त्व-वादिनोर्विवदमानयोः षड्हान्यतीतानि·· ···तस्मिन् विवादे मायावादिना तत्त्ववादी जितः। तदा श्रीवल्लभोऽब्रवीत् रे मायावादिन् मयि जिते जितं ····· श्रीवल्लभनाप्रयासेन मायावादी जितः। तत्र राजप्रसादजं द्रव्यं पूर्व्वं विवदमानयोरुभयोः दत्त्वा यथेच्छया प्रस्थातुमारेभे। तत् श्रुत्वा व्यासतीर्थैः ······प्रार्थितं अत्र भवद्भिः कियत्कालं स्थातव्यं। वल्लभेन स्थितं।···· व्यासतीर्थैः······विचारितं यद्ययमस्मत्सम्प्रदायी भवति ह्यस्मन्मार्गरक्षा समीचीना स्यात्······एतस्मिन्नन्तरे विष्णुस्वामीसम्प्रदायी द्राविड़देशीयो विल्वमङ्गलः श्रीवल्लभस्य स्वप्ने आत्मानं दर्शयामास आह च न त्वया व्यास-तीर्थशिष्येण भाव्यं······[मयि] भगवतोक्तं भविष्यत्यस्मिन् युगे मत्-सख्याग्न्यवतारो वल्लभनामा तस्मिन्नहमाविश्य जीवानां चतुर्लक्षं केवलं भक्तिमार्गेण उद्धरिष्यामि विष्णुस्वामिमतं सर्व्वं तस्मै प्रोक्त्वा पश्चात् मत्-समीपं त्वमायास्यसि······विष्णुस्वामिमार्गीया सृष्टिः सारस्वतकल्पीया······ श्रीमद्भगवद्गीता श्रीभागवतोक्तसिद्धान्तो विष्णुस्वामिमार्गीयाणां श्रीसूर्य्य-मण्डलस्थहिरण्यपुरुषप्रोक्तं श्रुत्यादीनां सिद्धान्तः·· ···श्रीविष्णुस्वामि-मार्गीयाणां शुकवागमृताब्धिचन्द्रश्रीगोपीजनवल्लभ एव। अत्राग्निराचार्य्यो भगवन्मुखं नारदीयपञ्चरात्रवैखानसाद्युक्तविधिना दीक्षापूजादिचये श्रीविष्णु-स्वामिमार्गे आत्मनिवेदनपूर्व्वकप्रेमैव भक्तिमार्गः सम्प्रत्यस्मन्मार्गीया अपि शङ्करमायया भ्रान्ताः अस्मिन् विद्यानगरे श्रीवल्लभाचार्य्यश्रीविट्ठलाख्यपुरुषो-त्तमोऽस्ति असावेव भवतामात्मसमर्पणं कारयिष्यति। ततो विष्णुस्वामि-मार्गः प्रकाशनीयः इत्युक्ते श्रीवल्लभैः प्रबुद्धं।

[6] Then follows tbe conversion of Vyāsatīrtha and the advice of God Viṭṭhala to commence a Bhāṣya of Gītā, Bhāgavata and Vyāsa Sūttra according to the tenets of Viṣṇu Svāmi then obsolesent.

From Vidyānagara, Vallabha proceeded to Prayāga, Kāśī and Vadarikāśrama. At Vadarikāśrama Vyāsa appeared before him and granted him the boon of Omniscience. Vallabha came to Haridvāra and thence to Kurukṣettra. There he became the guest at Thāneśvara of Rāmānanda who worshipped Viṣṇu according to the Tāntṛk system. He was a worshipper of the stone Śālagrāma. Vallabha remonstrated with him saying that the stone is merely a temple. You should worship the image of Kṛṣṇa. He did not agree, but his brother Saṅkara agreed and became a disciple of Prabhupāda under the name of Prabhudāsa. Vallabha came to Benares, where under inspiration from Kṛṣṇa he married and had two sons Gopīnātha and Viṭṭhala. Gopīnātha died early leaving a son Puruṣottama. Viṭṭhala had many sons Giridhara and others. Viṭṭhala was the high Pontiff when the author wrote.

Vallabha was throughout his married life a Vedic Brāhmaṇa and kept up the sacrificial fire.

At Benares he came in conflict with the followers of Śaṅkara. The controversy continued for six months. Upendrāśrama, a noted name among the followers of Śaṅkara put a stop to the controversy by his personal influence. But some of his followers wanted to take the life of Vallabha. So he fled to Cunar, where he stopped for some time at Cyavanāśrama. Then he went to the district of Mathurā where he built a temple and worshipped Kṛṣṇa according to his own tenets. Keśava Bhaṭṭa Kāśmīrī of the place became his friend. Keśava heard the exposition of the whole of the Bhāgavata from Vallabha but did not become his disciple. But Mādhava Bhaṭṭa and others, disciples of Keśava joined Vallabha who utilised them in the work of writing his commentary on the Bhāgavata. Nārāyaṇa Miśra, a Kānyakubja Brāhmaṇa also became his disciple. At this time a large number of Brāhmaṇas from the east, west and south and Kṣatriyas became his disciples. Once on a time when he was sitting at his ease just before dusk at Gokula the young Kṛṣṇa came to him and requested him to follow. He followed the Lord across the Yamunā to a great distance up to Govardhana where Kṛṣṇa pointed out to him the spot where he sported with Rādhikā in solitude, the place was known only to Viṣṇu Svāmi and Villvamaṅgala. Subsequently

that place became the chief place of worship of Vallabha's sect. Vallabha met Śrīkṛṣṇa Caitanya at Purī. He wrote a commentary on Bhagavadgītā and 32 Upaniṣads. His chief disciples at Dvārakā were Nārāyaṇa Dvivedī and Acyutā śrama. Rāṇā Vyāsa was at first a disciple of Rāmānanda, but he at last became a disciple of Vallabha at Purī. Bhaṭṭa Vatsa and Dvivedī Govinda were also his disciples.

The work begins thus :—

श्रीगोपीजनवल्लभाय नमः ॥

योऽनुग्रहार्थं श्रुतिगोपिकानां गिरीन्द्रधर्त्ता[ज]नि रासमध्ये ।
बभूव भूयः स कलौ कलेशः स्वाम्यन्तविष्णुादिपदैकनामा ॥ १ ॥
स एव भूयोऽजनि वल्लभाख्यः स्वकीयमाहात्म्यमवादि येन ।
नत्वा त्रिरूपं तमहं करोमि तत्सम्प्रदायक्रममुक्तपूर्व्वम् ॥ २ ॥
श्रीवल्लभस्यात्मजविट्ठलेशे प्रमोदति प्राणिहितैकहेतौ ।
मार्गं तदीयं किल तस्य शिष्यो गदाभिधो वक्ति यथामतीदम् ॥ ३ ॥

Colophon. इति श्रीसम्प्रदायप्रदीपे श्रीकृष्णाख्यब्रह्मनिर्णये पञ्चमं प्रकरणम् ।

चिरं जीवत्विट्ठलाचार्य्यः श्रीमद्वल्लभनन्दनः ।
अंजसा या[यत्]प्रसादेन सिद्धान्तमिममध्यगाम् ॥

समाप्तोयं संप्रदायप्रदीपः ।

The chronology of the work so far as the earlier sects are concerned, is not reliable. It makes Śaṅkara, Hema Sūri Bhaṭṭācārya contemporaries. But it is reliable so far as the Vallabha sect is concerned.

3122

10279. The same.

'By Gadā of Vallabha's school.

Substance, foolscap paper. 12½ × 5½ inches, Folia 31. Lines, 9 on a page. Extent in ślokas, 810. Character, modern Nāgara. Appearance fresh, Complete.

Beginning :—श्रीगोपीजनवल्लभाय नमः ॥

योऽनुग्रहार्थं श्रुतिगोपिकानां गिरीन्द्रधर्त्ताजनिरासमध्ये ।
बभूव भूयः स कलौ कलेशः स्वाम्यन्तविष्णुादिपदैकनामा ॥

5 B एवं श्रीमन्नृपयुधिष्ठिरराज्यसमयाद् दशसहस्रवर्षपर्य्यन्तं कलौ भागवता भविष्यन्तीति सिद्धं ।

6 B. युधिष्ठिरराज्यसमयात् किञ्चित् कलौ गते द्राविड़ेषु कश्चिद्राजा बभूव । येन धर्म्मेणाखिलं भारतं वर्षं वशीकृतं । तस्य राज्ञः सकलराज्य-भारधौरेयः सचिवो ब्राह्मणो बभूव । तस्य ब्राह्मणस्यात्मजातः श्रीविष्णु-स्वामीत्यासीत् ।

13 B. इति श्रीसंप्रदायप्रदीपे विष्णुस्वामीशचरिते द्वितीयं प्रकरणं । (Col. Ch. I wanting).

अथ श्रीविष्णुस्वामिसंप्रदाये विल्वमंगलनामा बभूव विल्वमङ्गलौ द्वावभूतां·······एकः काश्यां एको द्राविड़े द्राविड़देशीयो विष्णुस्वामि-सम्प्रदायो यः काशीवासी द्वितीये जन्मनि जयदेवनामा बभूव । येन श्रीगी-तगोविन्दगानं कृतं । तस्य चत्वारः अवतारा: प्रथमं माधवानलो अवतारः (रा) द्वितीये जन्मनि विल्हणनामा पण्डितः तृतीये जन्मनि विल्वमंगलो ब्राह्मणः (णा) चतुर्थे जन्मनि जयदेवः कामकन्दला शशिकला काश्यां वेश्या पद्मावतीति क्रमादारभ्य श्रीगोपीजनवल्लभाख्ये तत्त्वे + + + + विल्वमंगले विष्णुस्वामिमार्गं प्रकाशयति तच्छिष्यतया बहवो गोपीजनवल्लभ-तत्त्वविदो बभूवुः तदा भगवान् तत्त्वज्ञाने[ऽ]नधिकारिणो जनान् मत्वा पुरातनीं पौराणिकीं कथां सस्मार अत्रान्तरे श्रीमहादेवः कैलासशिखरे ... .श्रीपुरुषोत्तमं समाधिना चिन्तयामास ।

Thus begins the story of Śaṅkara and other minor stories referred to above.

19 A. तेषां (शङ्करशिष्याणां) मध्ये एको मध्वनामा ·········सोपि शङ्कराद् गृहीतसन्न्यासः । तस्य स्वप्ने निशि श्रीरामचन्द्रः प्रादुर्बभूव । वाक्यमाह च साधो त्वया शङ्करवचने न स्थातव्यं यतो भवान् हनुमदंशः । त्वं वैष्णवसम्प्रदायप्रवृत्तयेऽवतीर्णः शङ्करकृतं व्याससूत्रभाष्यमुत्तरमीमांसा-लक्षणं पूर्व्वपक्षीकृत्य......पुनर्व्याससूत्राणि व्याकुरु .....ततोऽसौ शङ्कर-दर्शितमार्गं विहाय श्रीरामचन्द्रदर्शितमार्गेण वैष्णवसम्प्रदायं प्रवर्त्तयामास ... ..इति समासतो मध्वाचार्य्यसम्प्रदायोत्पत्तिः । विल्वमंगलतः पश्चात् मध्वाचार्य्यात् पूर्व्वं द्राविड़े कश्चिद्रामानुज इति ब्राह्मणो बभूव । तस्य

लक्ष्मीं समाराधयतो लक्ष्मीः प्रसन्नाभवत्। वत्स वरं ब्रूहीति उवाच। तेनोक्तं देवि भगवद्धर्म्मं वद। ततस्तया गरुड़ आज्ञप्तः। ततो गरुड़ेन तस्मै नारायणीयसिद्धान्तः समर्पितः। तस्मात् संप्रदायः प्रावर्त्तत..... तस्मिन्नेव सम्प्रदाये केचिद्धरिहरोपासकाः अगस्तिपरशुरामकृताः।

19 B. श्रीवैष्णवाः श्रूयन्ते। इति रामानुजसम्प्रदायोत्पत्तिः। अस्ति दक्षिणापथे पाण्डुपुरं नाम नगरं तत्र श्रीविठ्ठलो भगवत्स्वरूपं अस्मिन् पुरे कश्चित् निम्बादित्यनामा ब्राह्मणो बभूव। तस्मै श्रीविठ्ठलेन स्वसिद्धान्त-मुपदिष्टं......एवं श्रीविष्णुस्वामि-रामानुज-मध्वाचार्य्य-निम्बादित्या इति चत्वारः सम्प्रदायप्रवर्त्तकदाक्षिणात्याः।

20 A. चत्वार उपसंप्रदायाः -चैतन्य-स्वरूप-प्रकाश-नंदा इति। विष्णुस्वामिन उपसंप्रदायश्चैतन्यः। रामानुजस्य नन्दः। मध्वाचार्य्यस्य प्रकाशः। निम्बादित्यस्य स्वरूप इति प्राच्याः स्वरूपप्रकाशौ विच्छिन्नौ कालेन। एषु बलिष्ठाचार्य्याभावात् शास्त्रव्याख्याननिबंधादि न प्रवर्त्तते।

20 B. इति श्रीसम्प्रदायप्रदीपे विष्णुस्वामिस्नेहपात्रे विल्वमंगल-प्रवृत्तौ श्रीवल्लभप्रदीप++सर्व्व सम्प्रदायोत्पत्तिप्रकरणं तृतीयं।

श्रीवल्लभो यदि मदीयहृदीश्वरोस्ति
श्रीगोपिकाहृदयपल्वलराजहंसः।
सत्येन तेन मम वाञ्छितदीपवृत्तं
सर्व्वं प्रकाशमुपयातु यथार्थतोऽत्र॥

अस्ति दक्षिणापथे तिलंगाभिधो जनपदः......यत्र सकलब्राह्मण-गुणालंकृत-श्रीमल्लक्ष्मणभट्टकुलकमलविकाशमार्त्तण्डः श्रीवल्लभाचार्य्यः प्रादु-र्बभूव ......etc., etc.

The last chapter is entirely taken up with the account of Vallabha, which is well known.

End. तदालर्कपुरे [वह्नि]जन्युपद्रवो[ऽ]कस्माज्जातः तदा पत्नी श्रीवल्लभमग्निहोत्रशालस्थं श्रीवल्लभं प्रत्याह। स्वामिन् निर्गम्यतां गृहा-दग्निरायाति। एवमुक्तोऽसावाज्ञां मन्यमानः श्रीवल्लभो निर्गत्य गङ्गातीर उपविष्टः। तत्र त्रिदण्डिविधिना नारायणेन्द्रतीर्थतः प्रैषमुच्चार्य्य यथा श्रीविष्णुस्वामिना तथा ++++भूत्वा वै काश्यां गतं। तत्रैकविंशतिमे

दिवसे स्वरूपमायुः। ततः कियता कालेन तज्जेष्ठपुत्रो गोपीनाथः पुरुषोत्तममासाद्य स्वरूपमवाप। तत्पुत्रः पुरुषोत्तमाख्यश्च। अथ श्रीविट्ठलेश्वरः सर्व्वदा जयति। तत्पुत्राः श्रीगिरिधरादयः श्रीवल्लभादनवमाः पौत्रादयश्च सर्व्वदा जयन्ति।

Colophon. इति श्रीसंप्रदायप्रदीपे श्रीविष्णुस्वामिविल्वमंगलपटि[रि]करे श्रीवल्लभचरिते चतुर्थं प्रकरणं ॥ ४ ॥

3123

1616. The same.

Substance, country made paper 9¼" × 4" inches. Folia, 60. Lines on a page 8. Extent in ślokas 950. Character Nāgara. Fresh. Complete.

Last Colophon—

इति श्रीसम्प्रदायप्रदीपे श्रीकृष्णाख्यब्रह्मनिर्णये पञ्चमं प्रकरणं।

Post Colophon—

श्रीवल्लभो जयति।

चिरञ्जीवत्विह्नाचार्य्यः श्रीमद्वल्लभनन्दनः।
अच्चमा यत्प्रमादेन सिद्धान्तमिममध्यगां॥

समाप्तोऽयं सम्प्रदायप्रदीप[ः]। श्रीमत्वल्लभाचार्य्यचरणकमलेभ्यः नमः। लिखीतं तीवाड़ी श्रीरामब्राह्मण। In a different hand मुकुटनाथ शर्म्मणः पुस्तकमिदं।

3124

1304. वैष्णववार्त्तामाला Vaiṣṇava Vārttāmālā.

Compiled by Śrīnātha Deveśa.

Substance, country-made paper. 13 × 5 inches. Folia, 82. Lines 12-15 on a page. Extent in ślokas 1200. Character Nāgara. Appearance, old and worn out at the end. Complete.

It begins—

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीवल्लभाय नमः। श्रीविट्ठलेश्वराय नमः। श्रीगोपीजनवल्लभाय नमः।

जयत्यनन्तलील: श्रीगोवर्द्धनधर: प्रभु: ।
व्रजनागरिक: कृष्ण: साङ्गोपाङ्गस्तु पार्षद: ॥ १ ॥
अथासीद्दक्षिणे देशे खंभंकाकरसंज्ञिके ।
यज्ञनारायणो भट्टस्तैलङ्गयाज्ञिको द्विज: ॥ २ ॥
स भारद्वाजगोत्रोग्रस्तैत्तरीययजु:कृती ।
वेदादिसर्व्वशास्त्रज्ञो विष्णुस्वामिमतानुग: ॥ ३ ॥
ततसुतोऽभूत् सोमयाजी गङ्गाधर इति श्रुत: ।
तस्य सूनुर्गणपतिस्तस्य श्रीवल्लभ: सुत: ॥
तस्य श्रीलक्ष्मणा यज्वे लम्मगारुपतिर्महान् ।
तस्य पुत्रा रामकृष्णश्रीश्रीवल्लभकेशवा: ॥ ५ ॥
तेषां मध्येऽभवद् य: श्रीवल्लभ: सोऽग्निरेव हि ।
आचार्य्यो भगवान् साक्षादाज्ञया श्रीहरेरिह ॥ ६ ॥
महालक्ष्मयां तस्य गोपीनाथो ज्येष्ठ: सुतो बल: ।
यस्यैक आसीत्तनय: पुरुषोत्तम इत्यलम् ॥ ७ ॥
कृष्णोऽभूत् श्रीवल्लभस्य कनिष्ठो विट्ठल: सुत: ।
आचार्य्यरत्नं स महान् यतो गिरिधरादय: ॥ ८ ॥
गिरिधरश्च गोविन्दो बालकृष्णश्च वल्लभ: ।
रघुनाथो यदुपतिर्घनश्याम इति क्रमात् ॥ ९ ॥
रुक्मिण्यां षट्सुता जाता: पद्मावत्यां तु सप्तम: ।
यत् सन्ततिरिहाद्यापि राजते श्रेयसे नृणाम् ॥ १० ॥
तान्नौमि श्रीमदाचार्य्यान् श्रीवल्लभविभावसून् ।
विधूंश्च श्रीविट्ठलेशान् यान् प्रपन्ना हरिं गता: ॥ ११ ॥

चतुरशीतिकलक्षवियोनित:
समनुष्कृष्य तान् हरिरात्मनि ।
समनुगृह्य यथा स वशे सतां
तदनुवृत्तमथेह तथोच्यते ॥ १२ ॥

श्रीमदाचार्य्यगोस्वामिसेवकानां हरिं जुषाम् ।
वर्णनामिह लिख्यन्ते वार्त्ता: स्त्रीणां तथा नृणाम् ॥ १३ ॥

गोकुले गोविन्दघट्टे वैद्यामाचार्य्यसूरय: ।
आसीना विश्रमन्तस्ते कचिदित्थं व्यचिन्तयन् ॥ १४ ॥
महाप्रभोरिति ह्याज्ञावचनं यदिह त्वया ।
जीवानां ब्रह्मसंबन्ध: कार्य्य[:] स च कथं भवेत् ॥ १५ ॥
जीवा: स्वभावतो दुष्टा: कलिकाले विशेषत: ।
इति चिन्तातुरेष्वाराच्छ्रीगोपीजनवल्लभ: ॥ १६ ॥
आविर्भूयार्यानपृच्छत् कुतश्चिन्तातुरा: स्थ भो: ।
श्रुत्वेत्यार्य्या: प्रोचुरहो जीवा दुष्टा इति स्वयम् ॥ १७ ॥
भवान् वेद स संबन्धो ब्रह्मणस्ते कथं घटेत् ।
इत्याकर्ण्याथ विभुनाचार्य्यान् प्रत्युक्तमादरात् ॥ १८ ॥
जीवानां ब्रह्मसंबन्धबोधनं कार्य्यमार्य्यका: ।
तानहं स्वीकरिष्यामि भवन्नामोपदेशत: ॥ १९ ॥
निवृत्तसर्व्वात्मदोषानिति श्रावणशुक्लके
एकादश्यामर्द्धरात्रे पवित्राद्वादशीयुजि ॥ २० ॥
साक्षात् भगवता प्रोक्तं पवित्रं श्रीप्रभोर्गले ।
तस्मिन् कालेऽर्पितं चार्य्यै: सिता खण्डीकृतापि च ॥ २१ ॥
तदक्षरश आचार्य्यै: स्वानुभूतं निरूपितम् ।
स्वसिद्धान्तरहस्यार्थे ग्रंथे समवधार्य्यताम् ॥ २२ ॥
अथ कस्मिंश्चन पुरे श्रीमदाचार्य्यसेवक: ।
श्रीदामोदरदासाख्यो हरसानीति विश्रुत: ॥
ज्ञात्वा समर्पितस्वात्मा श्रीवल्लभपदानुग: ।
दमलेति च संबोध्य वल्लभाचार्य्यदाक्षिता: ॥
प्रीत्या यस्यार्थ इत्याहुरेष पुष्टिपथस्तव ।
हितार्थं वै प्रकटितस्तथा भागवतीं कथाम् ॥
रसभावभृतां नित्यं कथयन्ति स्म ते रह: ।
किञ्च वार्त्ता भगवतो न भवेद् वा यदा क्वचित् ॥
तदेति कथयन्ति स्म दमलाजनि भीश्चिरम् ।
• प्रभोर्वार्त्ता न हि कृता क्रियतामधुनेति यत् ॥

स तादृगन्तरङ्गोऽभूत् येन गोपीपतिः श्रुतम् ॥
श्रीवल्लभाचार्य्यवर्य्यां ब्रह्मसंबन्धबोधनम् ॥
तदनु श्रीमदाचार्य्यैर्दामोदर किमु श्रुतम् ॥
त्वया भगवतः प्रोक्तमिति पृष्टो जगाद सः ।
श्रुतं भगवतः प्रोक्तं न तु बुद्धं मयेति किम् ॥
तदा श्रीवल्लभाचार्य्यैः सूचितं भोः प्रभोर्मयि ।
ब्रह्मसंबन्धवचनं प्रोक्तं जीवहिताय हि ॥
तद्द्वाराङ्गीकृतिर्विष्णोः सर्व्वदोषनिवृत्तितः ।
तदाज्ञाय स तुष्टोभूदात्मानं मतः मुदा ॥
कृतार्थं भुवि मन्वानः कृपयाचार्य्यपादयोः ।
जात्वन्तिके भगवतः स्वाचार्य्यैः प्रार्थितं हृदा ।
मा दामोदरदासस्य संस्था भूत् पुरतो मम ।
भगवन् गोत्वमार्गञ्च प्राप्नोत्विति विषादतः ।
तदोमिति प्रदायैव ह्याय्येष्वन्तर्हितो हरिः ॥
एकदा श्रीविट्ठलेशस्तत्पुत्राः स्वसभास्थितं ।
श्रीदामोदरदासाख्यं पृष्टवन्तः स्वसेवकम् ॥
भो दामोदरदास त्वं श्रीमदाचार्य्यदीक्षितान् ।
किंस्वरूपान् विजानासि वदेति सततोऽवदत् ॥
योह्यत्र जगदीशोऽस्ति सर्व्वंगीतो महान् प्रभुः ।
ततोऽपि ह्यधिकान् जाने स्वाचार्य्यान् वल्लभाभिधान् ॥
इत्याकर्ण्यैव गोस्वामिश्रीविठ्ठलमहाशयाः ।
उक्तवन्तः कथमिदमीश्वरादपि तेऽधिकाः ॥
ततो दामोदरः प्राह भोः श्रीश्रीविठ्ठलेश्वराः ।
देयं गुर्व्वथवा दातेत्येतदेव विचिन्त्यताम् ॥
पार्श्वेऽधिकं धनं यस्य यदि राति न कर्हिचित् ।
तर्हि स्वित् तस्य किं कोर्थो यो ददाति स वै गुरुः ॥
श्रीशाख्यं यद्धनं सर्व्वं स्वमाचार्य्या ददुर्यदि ।
अस्मादृशेषु जीवेषु ततस्तेऽभ्यधिका मताः ॥

इत्याकर्ण्य वचस्तस्य श्रीविट्ठलमहाशयाः ।
सन्तुष्टहृदयाः स्वीयमनुग्टह्णन्ति ते स्म तम् ॥
किञ्चैकदा श्रीगोस्वामिश्रीमदाचार्य्यसूनवः ।
स्वैरं स्थिता रमन्ते स्म पार्श्वं कुम्भनदासकः ॥
गोविन्दस्वामिनामन्ये तथा द्वित्राश्च सेवकाः ।
उपविष्टा रहस्यग्रे हसन्तो हासयन्ति च ॥
तदैव दामोदराख्यमालोक्यागतमन्तिकं ।
उत्थिताः श्रीविट्ठलेशाः श्रीगोस्वामिमहौजसः ।
तत्रोपवेशयामासुश्चान्तिके तं महादरात् ।
तदा दामोदरेणोक्तं श्रीगोस्वामि पुरः स्वतः ॥
महाराजा न मार्गोऽयं सुनिश्चिततया मतः ।
किन्तु कृच्छ्रेणोपगते हरौ चिन्तात्मभावतः ॥
तदा गोस्वामिभिः प्रोक्तं सत्यमुक्तं त्वयानघ ।
परन्तु श्रीमदाचार्य्यकृपा यत्र यदा तदा ॥ इत्यादि

It ends—

इति हि वल्लभदेवमहौजसां
चतुरशीतिमिताः कथिताः कथाः ।
तदनु तत्सुतविट्ठलशर्म्मणा-
मिह चतुर्युतविंशतिमम्मिताः ॥
चतुरशीतिकभक्तिरमश्रुते-
श्चतुरशीतिकभक्तिकथा श्रुतेः ।
चतुरशीतिगणो भुवि मच्यते
चतुरशीतिकलक्षवियोनितः ॥

महित्वमूलतत्त्वस्वरूपिणां विट्ठलेशचरणानां शरणमितानां श्रुत्वा तत्त्व-कथाः स्यादतत्त्वनिर्म्मुक्तः ॥

इति श्रीशाचार्य्यवर्य्यपदभक्तिमता मया ।
कृतया वैष्णवकथामालयात्मा प्रमोदतु ॥ २५ ॥

Colophon. इति श्रीविष्णुस्वामिमतानुवर्त्ति-श्रीवल्लभपादपद्मपरा-गानुरागि-महाशयमठेश-विप्रश्रीनाथदेवशर्मसंस्कृतायां वैष्णववार्त्तामालायां चतुरशीतिवार्त्तामणिकोत्तरं मसुमेरुपञ्चविंशतिमो मणि: । सम्पूर्णेयं वैष्णव-वार्त्तामाला पूर्व्वार्द्धे श्रीमत्तो उत्तरार्द्धे सौमा ।

Anecdotes of Vallabhāchārya and his son Viṭṭhaladeva in connection with their religious careers; those of the father number 84 and end in leaf 65, and those of the son 24; an additional chapter with a meru covers the concluding portion of the work. The work being a garland it requires a *meru* or an extra flower at the joint.

The word Vārtā is a Sanscritised form of the word वात in Rajasthāna which means historical anecdote of less authenticity than Khyāta, which means history.

3125

11031. नामावतार: Nāmāvatāraḥ.

Substance, country-made paper 8½ × 4 inches. Folia 5. Lines, 5 on page. Character, modern Kāśmīrī. Appearance, fresh. Incomplete at the end.

An interlocation between Janaka and Brahmā on Nānaka who is described as an incarnation of Viṣṇu.

Beginning : श्रों

श्रों ब्रह्माणं जनको भूप: स्थितं तत्र ददर्श ह ।
ब्रह्माणं जनक: प्राह सन्देहो मे महानभूत् ॥
कलौ लोका भविष्यन्ति दुराचारा[:] सपापिन: ।
निष्कृतिश्च कथं तेषां नरकाच्चे वद प्रभो ॥
जनकस्य वच: श्रुत्वा ब्रह्मा प्रोवाच सादरम् ।
शृणु राजन् कथां दिव्यां कलिपापप्रणाशनीम् ॥
पूर्वं दृष्टं विष्णुलोकं वैकुण्ठाख्यं गतं मया ।
विष्णो: सकाशादाश्चर्य्यं राजन्नेतन्मया श्रुतम् ॥
विष्णुलोके महाप्राज्ञो राजा तत्र स्थिते मयि ।
श्रुत्वाम्बरीष: पप्रच्छ विष्णुसान्निध्यग: प्रभुम् ॥

विष्णो ते महदाख्यानं श्रुतं भूलोकवासिना ।
तत्रावतारो बहुशो (सो) मायिनस्तेऽवधारितः ॥
नामावतारश्च श्रुतः कदा यास्यति तद्वद ।
इति पृष्टो महाविष्णुः विहस्या[हा]म्बरीषकम् ॥
राजर्षे त्वं प्रियतमो मम भक्तिपरायणः ।
अतः शृणु कथां दिव्यां कथयामि तव प्रियाम् ॥
गते चतुःसहस्राब्दे(ब्द) राजन् पञ्चशते तथा ।
कलौ सप्ततिके (४५७०) चापि दुराचारः प्रवर्त्तते ॥
तदा नामावतारो मे पञ्चाले यास्यति ध्रुवम् ।
कलिदोषहतज्ञानलोकस्योद्धारहेतवे ॥
क्षत्रियस्य कुले भूत्वा नानकेति च नामतः ।
शेषानन्तगुरुं कृत्वा वक्ष्ये सिद्धिपथं नृणाम् ॥
शिष्याः प्राप्स्यन्ति पदवीं मम ध्यानपरायणाः ।
इमं नामावतारं मे विद्धि विष्णुपरायण ॥
अवतीर्य च भूर्लोके नाममाहात्म्यमद्भुतं ।
परस्परं वदिष्यन्ति तत्तुल्या मत्परायणाः ॥

... .

4B. इति नामावतारस्य कथिता ते कथा शुभा ॥ ४० ॥
अन्या कापि च राजंस्ते शुश्रूषा तां वदस्व मे ।
नामावतारमाहात्म्यमेवं श्रुत्वा महामतिः ॥ ४१ ॥
नत्वा च परया भक्त्या प्रीत्या नोवाच किञ्चन ।
तस्मिन् काले कलिस्तत्र विष्णुं द्रष्टुं समागमत् ॥ ४२ ॥
विष्णुं नत्वाञ्जलिं बद्ध्वा दूरदेशे स्थितोऽभवत् ।
विष्णुं कलि[:] प्रणनाम प्रहृष्टोत्वोवाच कलि[?] शृणु ॥४३॥

Here ends the ms.

3126

10944. **नानकचन्द्रोदयः** Nānakacandrodayaḥ.

Substance, country made paper. 12 × 5 inches. Folia, 221. Lines, 11 on a page. Extent in ślokas 5700. Character, modern Kāśmīrī. Appearance, fresh. Complete.

Post Col. संवत् ८८५ ।

The last verse

मूलाज्ञानतमिस्रं तापवितये निराकुर्व्वन् ।
सेव्यः सुजनचकोरै नानकचन्द्रोदयो जयति ॥

A historical poem recounting the achievements of Nānaka, the founder of the Sikh religion, in 21 cantos.

For a description of the work see I. O. catal. 3965. It appears from the following śloka that there was a Prākṛta version of the life-story of Nānaka as related by Bāla to Añgada and that Gañgārāma, a recluse at Benares, rendered it into Sanskrit in the present work, at the instance of Rājā Bhāgamalla.

बालाख्येन पुराङ्गदं प्रति कथा प्रोक्ता निज प्राकृत-
व्राह्मया नानकसंगितात्मविशदज्ञानाम्बुधेः श्रीगुरोः ।
गङ्गाराम मुदाद्य सव भवता गीर्व्वाणवाणीकृता
श्राव्या मे क्रियतेत्युवाच नृपतिः श्रीभागमल्लाभिधः ॥ ८ ॥
श्रीशब्दाम्बुधिसम्भवद्भ्रमतमोहृज्ज्ञानचन्द्रोदयो
विद्वद्वृन्दविवेकवैभवभवप्रोत्कर्षहर्षप्रदः ।
सच्चिद्ब्रह्मविलासिविश्वविजयप्रोद्दामिराशिप्रभुः
गङ्गारामउदासिवर्य्यविदितः काशीप्सितस्थानकृत् ॥ ९ ॥
सोयं सुधीः सकलशास्त्रसमृद्धविद्या
+ + विवेकनिपुणो मुदमादधानः ।
स्वाभीष्टदेवमभिवाञ्छित + + भुक्तिं
साम्राज्यदं विजयते प्रणमत् प्रवीणः ॥ १० ॥
श्रुत्वा वचस्तदखिलप्रियमेव गङ्गा-
रामैः स्वकीयजनसौख्यदनानकीया ।

सा श्राव्यतेऽङ्गदकथा नृपभागमल्लं
प्रत्यद्य संस्कृतपदावृतपद्यवृन्दा: ॥ ११ ॥
आदौ प्रणम्य सदयं गुरुधर्म्मदासं
ख्यातप्रभावहरिदासमदिगम्बरं च ।
श्रीचन्द्रसूनुसहितं गुरुनानकं च
सत्सङ्गतं सुरतराममुदारबुद्धिं ॥ १२ ॥

This ms. contains two more cantos than the I.O. ms. Their colophons :—

208B. इति श्रीगंगदादिक—यां विंश: प्र—व: २० ॥ इति श्रीनानकचन्द्रोदये अङ्गदादिकथायां एकविंश प्रस्ताव: ।

इति श्रीदेवराजरचितो नानकचन्द्रोदय: समा[प्त:] सा ।

The last two chapters were added by Devarāja. They are concerned with the disciples of Nānaka, down to Govinda Sinha.

200A. (Canto XX.)

जेतारोगां निर्ज्जितारातिषट्कं
दाता ब्रह्मज्ञानदातारमेतत् ।
भू[f](ो) मभर्त्ता भागमल्लाभिधानो
गङ्गारामं तापसं पृच्छति स्म ॥ २ ॥
आकर्णिता यतिवरस्य कथा समग्रा
बालेन या निगदिता गुरवेऽङ्गदाय ।
शुश्रूषुरस्मथ कथं गुरवोऽङ्गदाद्या:
सिंहासनं समगमन् गुरुनानकस्य ॥ ३ ॥

गङ्गारामस्तमूचे गुरुशरणयतेर्द्वारिकादासनाम्नो
वैश्यानामीश्वरस्य प्रथममक[थ]यं तां कथां प्रश्नतोऽहं ।
तत्रासीद्देवराज: परमकवयिता धारणाशक्तिशाली
स त्वां वच्यत्यशेषं यतिपतिरचितं चारु संस्कृत्य वक्ता ॥ ४ ॥

अथ देवराजकविना कथितं
कथिताङ्गदस्य पदलाभकथा।
अधुना शृणु क्षितिपतेऽवहितः
षडुरस्य सौ [?] स्थितिमधत्त कृतौ॥

Canto XXI. ends with the death of Govinda Siṅha, who on his death-bed declares the *Grantha* alone to be henceforward the Guru of the sect.

3127

10957. The same.

Substance, country-made paper. 15×5 inches. Folia, 233 of which foll. 2–98 are missing. Lines, 9-10 in a page. Character, modern Nāgara. Appearance, fresh.

Last Col महोज्ज्वलशाण्डिल्यवंशावतंस-त्रिपाठिरघुपतिशर्म्मतनूज-श्रीदेवराजशर्म्मनिर्म्मिते श्रीनानकचन्द्रोदये अङ्गदादिकथायां एकविंश-प्रस्तावः॥

समाप्तश्चायं ग्रन्थः। शुभं भूयात्॥

3128

10977. The same.

Substance, country-made paper. 12×6 inches. Folia, 2—98. Lines, 8, 9, 10 on a page. Character, modern Nāgara. Appearance, fresh. A mere fragment.

92A. इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां सुवर्णपुरगमनं नाम नवमः प्रस्तावः।

3129

10481. गुरुसिद्धान्तपारिजातः Guru-siddhānta-pārijātaḥ.

By Hara Siṅha Sādhu.

Substance, county-made paper. 11×5 inches. Folia, 75 of which the 7th, 47th—55th are missing. Lines, 11 on a page. Extent in ślokas 1350. Character, Nāgara of the 18th century. Appearance, discoloured.

On the lives and teachings of Guru Nānaka and his successors.

Beginning : श्रीगणेशाय नमः

गणाधीशं गुणाधीशं नगाधीशं सरस्वतीं ।
नराधीशं भजे रामं तत्परं गुरुनानकं ॥

The place and date of Nānaka's birth :

मद्रदेशे महापुण्ये तलवंडीतिनामिका ।
नगरी नागरैर्युक्ता पुण्यारण्यसमावृता ॥
तत्र क्षत्रकुले पुण्ये जातः कल्याणसंज्ञिकः ।
तस्य भार्य्या महापुण्या सती तृप्तेति नामिका ॥
तत्र जातो महाविष्णुः कलेर्दोषविभञ्जकः ।
शास्त्राक्षिवाणराकेशैः (१५२६) संख्याते शुभवत्सरे ॥
रवौ मेषे तृतीयायां सिते पक्षे शुभे दिने ।
पादे रात्रेर्यदा शिष्टस्तदा जातो महाशयः ॥

34B. इति श्रीमन्निर्म्मलवंशोत्पन्न-श्रीहरसिंह-साधुकृते श्रीगुरुसिद्धान्तपारिजातग्रन्थे उत्तरदिग्विजयशाखा नाम विश्रामः ।

39B. ० पश्चिमदिग्विजयशाखा नाम विश्रामः ।

46B. ० स्वयंज्योतिःशाखा नाम विश्रामः ।

56A. इति श्रीमन्निर्म्मलाश्रमाश्रितश्रीहरसिंहसाधुनिर्म्मिते श्रीगुरुसिद्धान्तपारिजातग्रन्थे गुरुरामदासशाखा नाम विश्रामः ।

61A. ० गुर्व्वर्ज्जुनशाखा नाम विश्रामः ॥

Last Col. in the Ms. इति श्री० गुरुहरिगोविन्दशाखा नाम विश्रामः ॥

3130

3742. चैतन्यचरितामृतम् Caitanya-caritāmṛtam.

A Sanskrit biography of Caitanya by Kavi Karṇapūra.

Substance, country-made paper. 13 × 4½ inches. Folia, 28 of which 10 and 12 are missing. Lines, 10 on a page. Character, Bengali of the 18th century. Appearance fresh.

It contains the Madhya Khanda only which is complete in 25 chapters.

इति मध्ये पञ्चविंशति परिच्छेदः ।

The work has been printed at Berhampura.

Beginning—

यस्य प्रसादादज्ञोऽपि सद्यः सर्व्वज्ञतां व्रजेत् ।
स श्रीचैतन्यदेवो मे भगवान् सम्प्रसीदतु ॥

मालतीमाधवे काचिन्ना[यि]कावचनम् ।

यः कौमार हरः स एव हि वरः etc., etc.

This is in Sanskrit but there is a more famous work of the same name and on the same subject by Kṛṣṇadāsa Kavirāja. in Bengali.

3131

5638. श्रीनिवासशाखागणनिरूपणम् Srīnivāsa-śākhā-gaṇa-nirūpaṇam.

Substance, country-made paper. 13½ × 4½ inches. Folium, 1. Character, Bengali of the 19th century. Appearance, old and discoloured.

There are 19 verses giving the names of the disciples of Śrīnivāsācārya, who is regarded as an incarnation of Caitanya in the next generation after him.

श्रीश्रीकृष्णचैतन्यचन्द्राय नमः ।

श्रीरूपप्रमुखैकशक्तिकतमैनाविष्करोति प्रभुः
ग्रन्थोऽयं वितनोति शक्तिपरया श्रीश्रीनिवासाख्यया ।
द्वे शक्ती प्रकटीकृतौ(?)करुणया चौणीतले येन सः
श्रीचैतन्यदयानिधिर्मम कदा द्रग्गोचरं [दृग्गोचरं]यास्यति ॥१॥
श्रीश्रीनिवासवरकल्पतरुं मनोज्ञं
श्रीकृष्णभक्ति(ी) फलकं करशाख्यपुष्ट(ष्ठ)म् ।
श्रीरामचन्द्रकविराजमु[ख](ख्य)प्रधानैः
शाखागणैः परिवृतं शरणं गतोऽस्मि ॥ २ ॥

श्रीलश्रीबलरामादिप्रशाखाकोपशोभितम् ;
श्रीनिवासं कल्पतरुं मत्प्राणं सततं भजे ॥ ३ ॥
श्रीश्रीनिवासकल्पद्रो[:] किञ्चित् शाखात्र वर्णिता ।
शाखाप्रशाखानन्तत्वात् तत्पादाज्ञानुकम्पया ॥ ४ ॥

श्रीरामचन्द्रं कविभूपतिं प्रभोः
शाखागणं यत् कृपया सुवर्णितम् ।
श्रीराधिकाकृष्णविलासवर्णना-
मृतं सुनी[ि]तं प्रणमामि तं विभुम् ॥ ५ ॥

सस्त्रीको रामचन्द्रश्चागोविन्दकविपार्थिवौ ।
तत् पुत्रो दिव्यसिंहाख्य[:] कविराज[:]स्त्रिया युतः ॥ ६ ॥
कर्णपूरो नृसिंहः श्रीभगवान् कविनृपतिः ।
वल्लविदासकविराजौ श्रीगोपीरमणगोकुलौ ॥ ७ ॥
कविराजौ वासुदेवश्रीवृन्दावनदासकौ ।
वनमालिकविनृपः श्रीदुर्गादासश्रीरूपकौ ॥ ८ ॥
सोदरौ रूपकविराज श्रीनिमाइकविभुमिगौ ।
तयोर्विमातृजश्यामदासः कविमहिपतिः ॥ ९ ॥
नारायण कविच्छमाभुक् श्रीनृसिंहसहोदरः ।
अष्टादश इमे ख्याताः कविराजा महीतले ॥ १० ॥
सस्त्रीकश्रीलगोविन्दचक्रवर्त्तिमहाशयः ।
तत्पुत्रो माधवेन्द्रश्च वंसिगोपालठक्कुरः ॥ ११ ॥
घटकत्वेन विख्यातौ श्रीरूपरघुनन्दनौ ।
श्रीरूपदासगोपालदासाख्यौ ठक्कुरावुभौ ॥ १२ ॥
ठक्कुरौ रघुनाथश्रीरामदासौ प्रभोः प्रियौ ।
श्रीराधावल्लभश्रीलमो[मु]कुन्दाख्यौ सहोदरौ ॥ १३ ॥
सोदरौ राधिकाकृष्णमथुरादासकावुभौ ।
श्रीलमोहनदासश्रीरामदासौ सहोदरौ ॥ १४ ॥
श्रीव्यासचक्रवर्त्ति [र्] तु राज्ञः पौराणक[:] सुधी ।
पुराणश्रावकादाख्याचार्य्योपाधिं ददौ नृपः ॥ १५ ॥

तेनाख्यातान्नाम्येक्रोसौ सर्व्वेषां परिमाणित: ।
तत्पत्नी श्रीमती इन्दुमुखी भक्तिपरायण ॥ १६ ॥
तत्पुत्रश्रीश्यामदासचक्रवर्त्तिमहामति ।
श्रीलश्रीवीरहम्बीरा महान् मल्लमहीपति: ।
श्रीजीवगोपाल[कान्त]दासाख्यो भक्तिलम्पट: ॥ १७ ॥
तत्पुत्रौ धाड़िहाम्बीरो [यु]वराज: श्रिया युत: ।
प्रभु स्व[श्व]सुरकौ श्रीगोपालरघुनन्दनौ ॥ १८ ॥
श्यालकौ श्रीस्यामदास श्रीरामचरणौ तथा ।
द्वौ चक्रवर्त्तिनौ ख्यातौ श्रीआत्मा[त्मा]रामटक्कुर[:] ॥ १९ ॥

Here ends the leaf.

3132.

8161.

Substance, country-made paper. 8 × 4 inches. Folia, 124. Lines, 7 on a page. Character, modern Nāgarī. Appearance, fresh. Foll. 56—58 are missing. Date, S. 1915.

This number contains two works by Priyādāsa.

I. हितकथामृततरङ्गिणी Hitakathāmṛta-taraṅgiṇī.

An interesting work. It gives the life story of Hita Harivaṅśa or Harivaṅśa, the founder of a school (Sampradāya) of Vaiṣṇavism. His father was brought to Delhi and made to settle there by the then reigning emperor. Hita Harivaṅśa was born there and the date of his birth is given as S. 1530=1474; At that time Behlol Lodi was reigning at Delhi and he, if the date given be correct, must have been the patron of his father.

Two of the works of Harivaṅśa are registered in the Cat. vol. 1.

It begins :—

श्रीराधावल्लभाय नम: ॥

श्रीमद्धिताचार्य्यप्रभुं प्रणम्य
प्रदर्श्यते तच्चरितामृतौघा ।
तरंगिणी तापनिवारिणीयं
सद्भक्तिभाजामवगाहनाय ॥

The great teacher of Vaiṣnavism is described here as an incarnation of Śrīhari.

8B. इति श्रीमद्धितहरिवंशचंद्रचरणारविंद-चंचरीक-प्रियादास-प्रदर्शितायां श्रीमद्धितकथामृततरंगिण्यां अवतारोपक्रमो नाम प्रथमस्तरंगः।

अथ वंशावलीं वच्मे व्यासमिश्रद्विजन्मनः।
यत्र पुत्रत्वमापन्नः श्रीमद्धितमहाप्रभुः॥
श्रीराधावल्लभस्यैव वपुर्नारायणाभिधः।
तन्नाभिकञ्जतो जातो वेदगर्भः प्रजापतिः।

The genealogy begins with Kāśyapa and we have the following names :—Caleśvara, Acyuteśvara, Haladhara, Śrīdhara, Pāṇidhara, Gaṅgādhara, Vijaya, Kulajit, Vidyādhara, Jālaya, Prabhākara, Himakara, (1) Keśavadāsa (2) Nṛsiṅhāśramā (the last two are brothers), Vyāsa Miśra (Son of Nṛsiṅha and the father of Hita Harivaṅśa).

14A. तस्यानुजो व्यासमिश्रः साक्षाद्रामो महामुनिः।
सर्व्वाम्नायरहस्यज्ञः पूजनीयोऽखिलद्विजैः॥
पत्न्या श्रीतारया भेजे अरुन्धत्या वशिष्ठवत्।
स्थितो देववनस्थाने पूर्व्वेषां यत्र संस्थितिः॥

... ...

सभा सभाजितैः सद्भिर्वर्णिता तस्य सद्गुणान्।
आकर्ण्य पृथिवीपालः प्रार्थनातः समाह्वयत्॥
नरेन्द्रं दययन् यातः शक्रप्रस्थाह्विकां पुरीं।
सुराधिपपुरीं रम्यां यथा वाचामधीश्वरः॥
विज्ञायान्तिकमायातं समुत्थाय निजासनात्।
सादरं स्थापयामास श्रीमिश्रं पृथिवीपतिः॥

... ...

15B. नरेन्द्रः प्राह सन्तुष्टः किं मया सुकृतं कृतं।
यदद्य दर्शनं प्राप्तं भवतामतिदुर्लभं॥
क्वाहं म्लेच्छकुलोत्पन्नो भवतां सङ्गमः क्व च।
क्व पापः क्व हरेर्भावः क्व कालः क्वापवर्णकः॥

... ...

16A. इत्थं संप्रार्थ्य रत्नानि राज्ञानर्घ्याण्यनेकशः ।
सोपस्कराणि यानानि रथादीनि शुभानि च ॥
बहवो वाजिभः श्रेष्ठाः नागाश्चापि नगोपमाः ।
पदातिभ्यो युतास्तेन श्रीव्यासाय निवेदिताः ॥

16B. इति श्रीमद्धितवंशावलीवर्णनं नाम द्वितीयः तरंगः, 20B. इति व्यासमनोऽभि+[मोहनं]नाम तृतीयस्तरंगः ।

Hitavaṃśa is born in the 4th Taraṅga. The date of his birth.

वर्षे पुष्कररामशम्भुवदनक्षौणीमिते वैक्रमे
राधाकृष्णदले सदा सुकृतिभिः संसेव्यमाने तदा ।
सोमे विश्वतिथौ रवेररुणतासंकाशिताकाशके
दिष्टे दृष्टिपथं गतो हितप्रभुर्दृष्टं रहस्यं परम् ॥

Another chronogram, giving the date of his birth is quoted in a later hand :—

श्रीकृष्णदासगोस्वामिचरणैरप्युक्तं ।
वियद्गुणेषु शुभ्रांशुसंख्ये संवत्सरे शुभे ।

24A. ० श्रीमदाचार्यप्रादुर्भावो नाम चतुर्थस्तरंगः ।

In the 5th Taraṅga, he settles at Vṛndāvana.
It ends in 29B.

प्रतन्यादानन्दं कृतसुकृतपुञ्जेषु सततं
तरंगिण्येषा श्रीहितचरितपीयूषनिवहा ।
विसंवादैः पङ्कैर्विरहितरसा भक्तितटिनी
सदा राधाकृष्णाभिधकनककृष्णाञ्जलसिता ॥

30A Last Col.

लीलावर्णनं नाम पञ्चमस्तरंगः ॥ समाप्तश्चायं ग्रन्थः ॥

II. सुश्लोकमणिमाला Suślokamaṇimālā.

The second work begins in 30A and concerns itself with the disciples of Hitaharivaṃśa, among whom are found Sanātana, Jīva Gosvamī and Haridāsa the well-known disciples of Śrī Caitanya, who came under the influence of Priyādāsa later at Vṛndāvana.

Beg. नत्वा श्रीमद्धिताचार्य्यं प्रियादासेन रच्यते ।
सुश्लोकमणिमालेयं श्रीमद्धितगुणाश्रया ॥

The object of the work :—

31A. अथ तच्छिष्यवर्गाणां प्रख्यातयशसां भुवि ।
साफल्याय गिरामत्र यथामति कथोच्यते ॥

38A. इति श्रीसुश्लोकमणिमालायां श्रीनरवाहनचरितप्रकाशो नाम प्रथमः स्तोकः ।

45A. ० श्रीव्यासचरितप्रकाशो नाम द्वितीयः स्तोकः ;

47A. ० गोपचरितं नाम तृतीयः स्तोकः ;

49B. ० श्रीवीलदासचरितवर्णनं नाम चतुर्थः स्तोकः ;

53B. ० विरागिचरिते पञ्चमः स्तोकः ।

61B. ० विठ्ठलदासचरितप्रकाशो नाम सप्तमः स्तोकः ;

62B. नृप-श्रीमोहनदासचरितप्रकाशो नामाष्टमः स्तोकः ;

65A. ० श्रील-बलदासचरितप्रकाशो नाम नवमः स्तोकः ;

71B. ० श्रीहरिदासतुलाधरचरितप्रकाशो नाम दशमः स्तोकः ;

73A. ० श्रीपरमानन्दचरितप्रकाशो नामैकादशः स्तोकः ;

80B. ० श्रीप्रबोधानन्दसरस्वतीचरितप्रकाशो नाम द्वादशः स्तोकः ;

82B. श्रीसनातनगोस्वामिचरित्रप्रकाशो नाम त्रयोदशः स्तोकः ;

85A. श्रीहरिदास[गो]स्वामिप्रकाशो नाम चतुर्दशः स्तोकः ;

89A. श्रीकर्म्मठीचरितप्रकाशो नाम पञ्चदशः स्तोकः ;

91B. ० श्रीगङ्गायमुनाचरितप्रकाशो नाम षोड़शः स्तोकः ;

94B. ० श्रीसेवकचरितप्रकाशो नाम सप्तदशः स्तोकः ;

95B. ० श्रीखड्गसेनचरितप्रकाशो नामाष्टादशः स्तोकः ;

96B. ० श्रीहरिवंशदासचरितप्रकाशो नामोनविंशः स्तोकः ;

99B. ० श्रीजयमल्लचरितप्रकाशो नाम विंशतितमः स्तोकः ;

102A. इति श्रीसुश्लोक० २१ स्तोकः ।
श्रीहिताचार्य्यशिष्याणां विख्यातयशसां भुवि ।
स्वसामर्थ्यानुसारेण चरितं किंचिदीरितं ॥

यद्यप्यन्येऽपि तच्छिष्या निकुञ्जा गणचारिणः ।
सन्ति तेषां तु गुप्तत्वात् नास्माभिर्व[illegible]नं कृतं ॥
अथ श्रीवनचन्द्रादिशिष्याणां चरितं ब्रुवे ।
राधाकृष्णरमाम्भोधिमज्जनानन्दितात्मनां ॥
तत्र यो हि पुरैवोक्तो विद्वद्वृन्दशिरोमणिः ।
चतुर्भुजस्वामिनामा सम्प्रतस्थापकोत्तमः ॥
सोऽगाद् दिग्विजयं कुर्व्वन् गौड़देशेषु कर्हिचित् ।
सहस्रशस्तत्र प्रेताः कृपया तेन तारिताः ॥
प्रभोर्नीराजनं दृष्ट्वा पीत्वा च चरणामृतं ।
गच्छन्तो भगवद्धाम प्रेताश्चक्रुः स्तुतिं परां ॥

104B. श्रीचतुर्भुजस्वामिचरितप्रकाशो नाम द्वाविंशः स्तोकः ;

106A. ० २३ स्तोकः ;

108B. चतुर्विंशः स्तोकः ;

110B. ० श्रीभुवनचौहानचरितप्रकाशो नाम पञ्चविंशः स्तोकः ;

111B. ० इति हरिदासतोमरचरितप्रकाशो नाम षड्विंशः स्तोकः

112B. ० श्रीगोविन्ददासचरितप्रकाशो नाम सप्तविंशः स्तोकः ।

113A. २८ ;

114A. श्यामसाहतोमरचरितप्रकाशो नाम २९ स्तोकः ;

115A. मोहनमाधुरीदासचरितप्रकाशो नाम त्रिंशः स्तोकः ;

117A. ० सुन्दरदासचरितप्रकाशो नामैकत्रिंशः स्तोकः ;

119A. ० श्रीलालस्वामिचरितप्रकाशो नाम ३२ स्तोकः ;

121B. ० श्रीध्रुवदासचरितप्रकाशो नाम ३३ स्तोकः ;

Last Col. इति श्रीमदाचार्य्यश्रीमद्धितहरिवंशचन्द्रचरणारविन्द-चञ्चरीकप्रियादासगुम्फिता सुश्लोकमणिमाला सम्पूर्णा ।

Post Col. संवत् १९१५ पौषे कृष्णे नवम्यां भौमवासरे ।

INDEX.